# सुन्दरकाण्ड सप्तविंशः सर्गः (२७) - ॥ त्रिजटास्वप्नः ॥

इत्युक्ताः सीतया घोरा राक्षस्यः क्रोध मूर्छिताः ।
काश्चिज् जग्मुस् तदाख्यातुं रावणस्य तरस्विनः ॥ १ ॥

ततः सीता मुपागम्य राक्षस्यो घोर दर्शनाः ।
पुनः परुष मेकार्थ मनर्थार्थ मथाब्रुवन् ॥ २ ॥

अद्येदानीं तवानार्ये सीते पाप विनिश्चये ।
राक्षस्यो भक्षयिष्यन्ति मांस मेतद् यथासुखम् ॥ ३ ॥

सीतां ताभि रनार्याभिर् द्रुष्ट्वा सन्तर्जितां तदा ।
राक्षसी त्रिजटा वृद्धा शयाना वाक्य मब्रवीत् ॥ ४ ॥

आत्मानं खादता नार्या न सीतां भक्षयिष्यथ ।
जनकस्य सुतामिष्टां स्नुषां दशरथस्य च ॥ ५ ॥

स्वप्नो ह्यद्य मया दृष्टो दारुणो रोम हर्षणः ।
राक्षसाना मभावाय भर्तुरस्या भवाय च ॥ ६ ॥

एवमुक्तास् त्रिजटया राक्षस्यः क्रोध मूर्छिताः ।
सर्वा एवाब्रुवन् भीतास् त्रिजटां तामिदं वचः ॥ ७ ॥

कथयस्व त्वया दृष्टः स्वप्नोऽयं कीदृशो निशि ।
तासां श्रुत्वा तु वचनं राक्षसीनां मुखाच्च्युतम् ॥ ८ ॥

उवाच वचनं काले त्रिजटा स्वप्न संश्रितम् ।
गज दन्तमयीं दिव्यां शिबिका मन्तरिक्षगाम् ॥ ९ ॥

युक्तां हंस सहस्रेण स्वय मास्थाय राघवः ।
शुक्ल माल्याम्बर धरो लक्ष्मणेन सहागतः ॥ १० ॥

स्वप्ने चाद्य मया दृष्टा सीता शुक्लाम्बरा वृता ।
सागरेण परिक्षिप्तं श्वेतं पर्वत मास्थिता ॥ ११ ॥

रामेण सङ्गता सीता भास्करेण प्रभा यथा ।
राघवश्च मया दृष्टश् चतुर्दन्तं महागजम् ॥ १२ ॥

आरूढः शैल सङ्काशं चचार सह लक्ष्मणः ।
ततस्तौ नर शार्दूलौ दीप्यमानौ स्वतेजसा ॥ १३ ॥

शुक्ल माल्याम्बर धरौ जानकीं पर्युपस्थितौ ।
ततस् तस्य नगस्याग्रे ह्याकाशस् थस्य दन्तिनः ॥ १४ ॥

भर्त्रा परिगृहीतस्य जानकी स्कन्ध माश्रिता ।
भर्तुरङ्कात् समुत्पत्य ततः कमल लोचना ॥ १५ ॥

चन्द्रसूर्यौ मया दृष्टा पाणिना परिमार्जती ।
ततस् ताभ्यां कुमाराभ्या मास्थितः स गजोत्तमः ॥ १६ ॥

सीतया च विशालाक्ष्या लङ्काया उपरि स्थितः ।
पाण्डु रर्षभ युक्तेन रथेनाष्ट युजा स्वयम् ॥ १७ ॥

इहोपयातः काकुत्स्थः सीतया सह भार्यया ।
लक्ष्मणेन सह भ्रात्रा सीतया सह वीर्यवान् ॥ १८ ॥

आरुह्य पुष्पकं दिव्यं विमानं सूर्य सन्निभम् ।
उत्तरां दिशमालोक्य जगाम पुरुषोत्तमः ॥ १९ ॥

एवं स्वप्ने मया दृष्टो रामो विष्णु पराक्रमः ।
लक्ष्मणेन सह भ्रात्रा सीतया सह राघवः ॥ २० ॥

न हि रामो महातेजाः शोक्यो जेतुं सुरासुरैः ।
राक्षसैर्वापि चान्यैर्वा स्वर्गः पाप जनैरिव ॥ २१ ॥

रावणश्च मया दृष्टः क्षितौ तैल समुक्षितः ।
रक्तवासाः पिबन् मत्तः करवीर कृतस्रजः ॥ २२ ॥

विमानात् पुष्पकादद्य रावणः पतितो भुवि ।
कृष्यमाणः स्त्रिया दृष्टो मुण्डः कृष्णाम्बरः पुनः ॥ २३ ॥

रथेन खरयुक्तेन रक्त माल्यानु लेपनः ।
पिबंस्तैलं हसन् नृत्यन् भ्रान्त चित्ता कुलेन्द्रियः ॥ २४ ॥

गर्दभेन ययौ शीघ्रं दक्षिणां दिश मास्थितः ।
पुनरेव मया दृष्टो रावणो राक्षसेश्वरः ॥ २५ ॥

पतितोऽवाक्छिरा भूमौ गर्दभाद् भय मोहितः ।
सहसोत्थाय सम्भ्रान्तो भयार्तो मदविह्वलः ॥ २६ ॥

उन्मत्त इव दिग्वासा दुर्वाक्यं प्रलपन्बहु ।
दुर्गन्धं दुःसहं घोरं तिमिरं नरकोपमम् ॥ २७ ॥

मलपङ्कं प्रविश्याशु मग्नस् तत्र स रावणः ।
कण्ठे बद्ध्वा दशग्रीवं प्रमदा रक्त वासिनी ॥ २८ ॥

काली कर्दम लिप्ताङ्गी दिशं याम्यां प्रकर्षति ।
एवं तत्र मया दृष्टः कुम्भकर्णो निशाचरः ॥ २९ ॥

रावणस्य सुताः सर्वे मुण्डास् तैल समुक्षिताः ।
वराहेण दशग्रीवः शिंशुमारेण चेन्द्रजित् ॥ ३० ॥

उष्ट्रेण कुम्भकर्णश्च प्रयातो दक्षिणां दिशम् ।
एकस्तत्र मया दृष्टः श्वेतच्छत्रो विभीषणः ॥ ३१ ॥

शुक्ल माल्याम्बर धरः शुक्ल गन्धानु लेपनः ।
शङ्ख दुन्दुभि निर्घोषै र्नृत्त गीतै रलङ्कृतः ॥ ३२ ॥

आरुह्य शैल सङ्काशं मेघस्तनित निःस्वनम् ।
चतुर्दन्तं गजं दिव्य मास्ते तत्र विभीषणः ॥ ३३ ॥

चतुर्भिः सचिवैः सार्धं वैहायस मुपस्थितः ।
समाजश्च मया दृष्टो गीत वादित्र निःस्वनः ॥ ३४ ॥

पिबतां रक्त माल्यानां रक्षसां रक्त वाससाम् ।
लङ्का चेयं पुरी रम्या सवाजि रथ कुञ्जरा ॥ ३५ ॥

सागरे पतिता दृष्टा भग्न गोपुर तोरणा ।
लङ्का दृष्टा मया स्वप्ने रावणे नाभिरक्षिता ॥ ३६ ॥

दग्धा रामस्य दूतेन वानरेण तरस्विना ।
पीत्वा तैलं प्रनृत्ताश्च प्रहसन्त्यो महास्वनाः ॥ ३७ ॥

लङ्कायां भस्म रूक्षायां प्रविष्टा राक्षस स्त्रियः ।
कुम्भकर्णादयश्चेमे सर्वे राक्षस पुङ्गवाः ॥ ३८ ॥

रक्तं निवसनं गृह्य प्रविष्टा गोमय ह्रदे ।
अपगच्छत नश्यध्वं सीतामाप स राघवः ॥ ३९ ॥

घातयेत् परमामर्षी सर्वैः सार्धं हि राक्षसैः ।
प्रियां बहुमतां भार्यां वनवास मनुव्रताम् ॥ ४० ॥

भर्त्सितां तर्जितां वापि नानुमंस्यति राघवः ।
तदलं क्रूर वाक्यैर्वः सान्त्व मेवाभि धीयताम् ॥ ४१ ॥

अभियाचाम वैदेही मेतद्धि मम रोचते ।
यस्या मेवंविधः स्वप्नो दुःखितायां प्रदृश्यते ॥ ४२ ॥

सा दुःखैर् विविधैर् मुक्ता प्रियं प्राप्नोत् यनुत्तमम् ।
भर्त्सितामपि याचध्वं राक्षस्यः किं विवक्षया ॥ ४३ ॥

राघवाद्धि भयं घोरं राक्षसाना मुपस्थितम् ।
प्रणिपात प्रसन्ना हि मैथिली जनकात्मजा ॥ ४४ ॥

अलमेषा परित्रातुं राक्षस्यो महातो भयात् ।
अपि चास्या विशालाक्ष्या न किञ्चि दुपलक्षये ॥ ४५ ॥

विरूपमपि चाङ्गेषु सुसूक्ष्म मपि लक्षणम् ।
छाया वैगुण्य मात्रं तु शङ्के दुःख मुपस्थितम् ॥ ४६ ॥

अदुःखार्हा मिमां देवीं वैहायस मुपस्थिताम् ।
अर्थसिद्धिं तु वैदेह्याः पश्याम्यह मुपस्थिताम् ॥ ४७ ॥

राक्षसेन्द्र विनाशं च विजयं राघवस्य च ।
निमित्त भूत मेतत्तु श्रोतु मस्या महत्प्रियम् ॥ ४८ ॥

दृश्यते च स्फुरच्चक्षुः पद्मपत्र मिवायतम् ।
ईषच्च हृषितो वास्या दक्षिणाया ह्यदक्षिणः ॥ ४९ ॥

अकस्मादेव वैदेह्या बाहुरेकः प्रकम्पते ।
करेणु हस्त प्रतिमः सव्यश्चोरु रनुत्तमः ।
वेपमानः सूचयति राघवं पुरतः स्थितम् ॥ ५० ॥

पक्षी च शाखा निलयः प्रहृष्टः
पुनः पुनश् चोत्तम सान्त्व वादी ।
सुस्वागतां वाच मुदीरयानः
पुनः पुनश् चोदयतीव हृष्टः ॥ ५१ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे सप्तविंशः सर्गः ॥ २७ ॥